# ShrI ShrI Chaitanya Upanishad

# શ્રીશ્રીચૈતન્યોપનિષત્

## Document Information

Text title : ShrI Chaitanya Upanishad

File name : chaitanyopaniShat.itx

Category : upanishhat

Location : doc_upanishhat

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : August 6, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીશ્રીચૈતન્યોપનિષત્

અથ પિપ્પલાદઃ સમિત્પાણિર્ભગવન્તં બ્રહ્માણમુપસન્નો,
ભગવન્ મે શુભં કિમત્ર ચક્ષસ્વેતિ ॥ ૧॥

સ હોવાચ ।
ભૂય એવ તપસા બ્રહ્મચાર્યેણ શશ્વત્ રમસ્વ મનો વશેતિ ॥ ૨॥

સ તથા ભૂત્વા ભૂય એનમુપસદ્યાહ -
ભગવન્ કલૌ પાપાચ્છન્નાઃ પ્રજાઃ કથં મુચ્યેરન્નિતિ ॥ ૩॥

કો વા દેવતા કો વા મન્ત્રો બ્રૂહીતિ ॥ ૪॥

સ હોવાચ । રહસ્યં તે વદિષ્યામિ -
જાહ્નવીતીરે નવદ્વીપે ગોલોકાખ્યે ધામ્નિ ગોવિન્દો દ્વિભુજો
ગૌરઃ સર્વાત્મા મહાપુરુષો મહાત્મા મહાયોગી
ત્રિગુણાતીતઃ સત્ત્વરૂપો ભક્તિં લોકે કાશ્યતીત ।
તદેતે શ્લોકા ભવન્તિ ॥ ૫॥

એકો દેવઃ સર્વરૂપી મહાત્મા ગૌરો રક્ત-શ્યામલ-શ્વેતરૂપઃ ।
ચૈતન્યાત્મા સ વૈ ચૈતન્યશક્તિર્ભક્તાકારો
ભક્તિદો ભક્તિવેદ્યઃ ॥ ૬॥

નમો વેદાન્તવેદ્યાય કૃષ્ણાય પરમાત્મને ।
સર્વચૈતન્યરૂપાય ચૈતન્યાય નમો નમઃ ॥ ૭॥

વેદાન્તવેદ્યં પુરુષં પુરાણં ચૈતન્યાત્માનં વિશ્વયોનિં મહાન્તમ્ ।
તમેવ વિદિત્વાઽતિમૃત્યુમેતિ નાન્યઃ પન્થા વિદ્યતેઽયનાય ॥ ૮॥

સ્વનામમૂલમન્ત્રેણ સર્વં હ્લાદયતિ વિભુઃ ॥ ૯॥

દ્વે શક્તી પરમે તસ્ય હ્લાદિની સંવિદેવ ચ । ઇતિ ॥ ૧૦॥

સ એવ મૂલમન્ત્રં જપતિ હરિરિતિ કૃષ્ણ ઇતિ રામ ઇતિ ॥ ૧૧॥

હરતિ હૃદયગ્રન્થિં વાસનારૂપમિતિ હરિઃ ।
કૃષિઃ સ્મરણે તચ્ચ ણન્તદુભયમેલનમિતિ કૃષ્ણઃ ।
રમયતિ સર્વમિતિ રામ આનન્દરૂપઃ ।
અત્ર શ્લોકો ભવતિ ॥ ૧૨॥

મન્ત્રો ગુહ્યઃ પરમો ભક્તિવેદ્ય ॥ ૧૩॥

નામાન્યષ્ટાવષ્ટે ચ શોભનાનિ, તાનિ નિત્યં યે જપન્તિ
ધીરાસ્તે વૈ માયામતિતરન્તિ નાન્યઃ ।
પરમં મન્ત્રં પરમરહસ્યં નિત્યમાવર્તયતિ ॥ ૧૪॥

ચૈતન્ય એવ સઙ્કર્ષણો વાસુદેવઃ પરમેષ્ઠી રુદ્રઃ શક્રો
બૃહસ્પતિઃ સર્વે દેવાઃ સર્વાણિ ભૂતાનિ સ્થાવરાણિ ચરાણિ ચ
યત્કિઞ્ચિત્ સદસત્ કારણં સર્વમ્ । તદત્ર શ્લોકઃ ॥ ૧૫॥

યત્કિઞ્ચિદસદ્ભુઙ્ક્તે ક્ષરં તત્કાર્યમુચ્યતે ॥ ૧૬॥

સત્કારણં પરં જીવન્તદક્ષરમિતીરિતમ્ ॥ ૧૭॥

ક્ષરાક્ષરાભ્યાં પરમઃ સ એવ પુરુષોત્તમઃ ।
ચૈતન્યાખ્યં પરં તત્ત્વં સર્વકારણકારણમ્ ॥ ૧૮॥

ય એનં રસયતિ ભજતિ ધ્યાયતિ સ પાપ્માનં તરતિ,
સ પૂતો ભવતિ, સ તત્ત્વં જાનાતિ, સ તરતિ શોકમ્ ।
ગતિસ્તસ્યાસ્તે નાન્યસ્યેતિ ॥ ૧૯॥

ન ચૈતન્યાત્ કૃષ્ણાજ્જગતિ પરતત્ત્વાત્પરમિહ ॥

ઇતિ ।

Encoded and proofread by PSA Easwaran

---

*ShrI ShrI Chaitanya Upanishad*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*